दानखण्डोक्त-
पुण्याहवाचन



अथ

दानखण्डोक्तपुण्याहवाचनं

प्रारभ्यते

संस्करण : फरवरी २००४, सम्वत् २०६०

मूल्य : ५ रुपये मात्र।

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop. Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
Email : Khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s. Khemraj Shrikrishnadass, Proprietors Shri Venkateshwar Press, Mumbai - 400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune - 411 013.

श्रीगणेशाय नमः ॥ अथ दानखंडोक्त पुण्याह
वाचनप्रयोगः ॥ संपूज्य गन्ध माल्याद्यैर्ब्राह्म
णान्स्वस्ति वाचयेत् ॥ धर्मकर्मणिमांगल्ये
संग्रामेऽद्‌भुतदर्शने ॥ १ ॥ पुण्याहवाचनंदैवं
ब्राह्मणस्य विधीयते ॥ एतदेव निरोंकारं कुर्या
त्क्षत्रियवैश्ययोः ॥ २ ॥ अवनिकृतजानुमंडलः
कमलमुकुलसदृशमंजलिं शिरस्याधायदक्षिणेन
पाणिना स्वर्णःपूर्णकलशं धारयित्वा दीर्घाना
गानद्योगिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमा

दा० णेन पुण्याहंदीर्घमायुरस्तु ॥ अपांमध्येस्थिता
२ देवाः सर्वमप्सुप्रतिष्ठितम् ॥ ब्राह्मणानां करे
न्यस्ताः शिवाआपोभवंतु ताः ॥ १ ॥ शिवा
आपः संतु ॥ लक्ष्मीर्वसतिपुष्पेषु लक्ष्मीर्वसति
पुष्करे ॥ सा मे वसतु वै नित्यं सौमनस्यं
तथास्तुनः ॥ १ ॥ सौमनस्यमस्तु ॥ अक्षतंचा
स्तुमेपुण्यंदीर्घमायुर्यशोबलम् ॥ यद्यच्छ्रेयस्करं
५. लोकेतत्तदस्तुसदामम ॥ १ ॥ अक्षतं चारिष्टं
चास्तु ॥ ब्राह्मणानां हस्ते गन्धादि दत्त्वा ॥

गंधः प्रदेयोदेवानामपत्यपुष्टिदश्चनः ॥ गंधद्वा
रांदुराधर्षामितिमंत्रेण भक्तितः ॥ १ ॥ गंधाः
पांतु सौमंगल्यंचास्तु ॥ पुष्पाणिपान्तुसौश्रेय
समस्तु ॥ अक्षताःपांतु आयुष्यमस्तु । तांबू
लानिपांतु ऐश्वर्यमस्तु । दक्षिणाः पांतु आरो
ग्यमस्तुदीर्घमायुः श्रेयः शांतिः पुष्टि स्तुष्टि
श्चास्तु ॥ श्रीर्यशोविद्याविनयो वित्तंबहुपुत्रं
चारोग्यंचायुष्यं चास्तु ॥ यं कृत्वा सर्ववेदयज्ञ
क्रियाकरणकर्म्मारम्भाः शुभाः शोभनाः प्रव

शां०

३ तन्ते तमहमोंकारमादिकृत्वा ऋग्यजुःसामाथ
र्वाशीर्वचनं ब्रह्मर्षिसंमतमनुज्ञातं भवद्भिरनुज्ञातः
पुण्यं पुण्याहं वाचयिष्ये। वाच्यताम्। ऋक्।
द्रविणोदाद्रविणसस्तुर विणोदाः सनरस्यप्रियं
सत्। द्रविणादा वीरवतीमिषन्नो द्रविणोदारा
सते दीर्घमायुः ॥ १ ॥ यजुः ॥ द्रविणोदाः
पिपीषतिजुहोतप्रचतिष्ठत। नेष्टादृतु भिरि
पु० ष्यत ॥ २ ॥ ऋक् ॥ सवितापश्चात्तात्सविता
पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्। सविता

नः सुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ १ ॥ यजुः ॥ । सवितात्वप्रसवानाठंसुवताम ग्निर्गृहपतीनाꣳसोमोऽवनस्पतीनाम् ॥ बृहस्प स्पतिर्व्वाचऽइंद्रोज्ज्यैष्ठ्यायरुद्रः पशुभ्यो मित्रः सत्योऽवरुणोधर्मपतीनाम् ॥ २ ॥ ऋक् ॥ ॐ नवोनवोभवतिजा यमानोऽह्नांकेतुरुषसामे त्यग्रम् ॥ भागं देवेभ्यो विदधात्यायनम्प्रचंद्र मास्तिरतेदीर्घमायुः ॥ १ ॥ यजुः ॥ ॐ नत द्रक्षा ꣳसिनपिशाचास्तरंति देवानामोजः

दा० प्रथमजᳪह्येतत् ॥ योबिभर्तिदाक्षायण ᳪ हिर
४ ण्यᳪसदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुते
दीर्घमायुः ॥ २ ॥ ऋक् ॥ ॐ उच्चादिविदक्षि
णावन्तो अस्थुर्येअश्वदाः सहतेसूर्येण ॥ हिर
ण्यदाऽअमृतत्वंभजन्तेवासोदाः सोमप्रतिरन्तऽ
आयुः ॥ १ ॥ यजुः ॥ उच्चातेजातमन्धसोदि
विसद्भूम्याददे ॥ उग्रᳪशर्म्ममहिश्रवः ॥
पु० इत्येताऋच ᳪ पुण्याहे ब्रूयात् ॥ व्रतनियमतपः
स्वाध्यायक्रतुदया दमदानविशिष्टानां सर्वेषां

ब्राह्मणानां मनः समाधीयताम् । समाहितम
नसः स्मः । प्रसीदंतु भवंतः।प्रसन्नाः स्मः । अथ
पूर्वस्थापितकलशात्ताम्रपात्रे जलमादाय यज्ञ
मानमूर्धनि दूर्वया सेचनंकुर्यात् ।। शांतिरस्तु
पुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुऋद्धिरस्तु अविघ्न
मस्तु आयुष्यमस्तु आरोग्यमस्तु शिव
मस्तु शिवं कर्म्मास्तु कर्म्म समृद्धिर
स्तुधर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्र
समृद्धिरस्तु पुत्रपौत्रसमृद्धिरस्तु धनधान्यसमृ

दा० द्धिरस्तु इष्टसंपदस्तु अनिष्ट निरसनमस्तु ॥
६ भूमौ ॥ यत्पापंरोगमशुभमकल्याणंतद्दूरेप्रति
हतमस्तु ॥ पात्रे ॥ यच्छ्रेयस्तत्तदस्तु उत्तरेक
र्मणिनिर्विघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु
उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां
तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नसंपदस्तु तिथि
करणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंताम् ॥
पु० तिथिकरणेसमुहूर्त्ते सनक्षत्रेसग्रहेसलग्ने सदै
वते प्रीयेतां दुर्गापांचाल्यौ प्रीयेताम् ॥

अग्निपुरोगाविश्वेदेवाःप्रीयंताम् इंद्रपुरोगा मरु
द्गणाः प्रीयंताम् वसिष्ठपुरोगा ऋषिगणाः
प्रीयंताम् माहेश्वरीपुरोगा उमामातरः प्रीयं
ताम् ॥ अरुन्धतीपुरोगा एकपत्न्यः प्रीयंताम्
विष्णुपुरोगाः सर्वदेवाःप्रीयंताम् ब्रह्मपुरोगाः
सर्ववेदाः प्रीयतामआदित्यपुरोगाः सर्वग्रहाः
प्रीयंतांब्राह्मचब्राह्मणाश्चप्रीयंताम् अंबिका सर
स्वत्यौ प्रीयंताम् श्रद्धामेधेप्रीयेताम् भगवती
कात्यायनीप्रीयताम् भगवती माहेश्वरी प्रीय
ताम् भगवती ऋद्धि करीप्रीयतांभग० वृद्धि०

दा०
प्रीं०भगवतीसिद्धिकरीप्रीयतां भगवतीपुष्टिकरी
६
प्रीयतांभगवतीतुष्टिकरीप्रीयतां भगवंतौविघ्न
विनायकौप्रीयेतांसर्वाःकुलदेवताः प्रीयंताम्सर्वा
ग्रामदेवताः प्रीयंतांसर्वाइष्टदेवताःप्रीयंताम् ।
भूमौ । हताश्चब्रह्मद्विषः हताश्चपरिपंथिनः ॥
हताश्चविघ्नकर्तारः शत्रवःपराभवंयांतु शाम्यं
तुघोराणिशाम्यंतुपापानिशाम्यंत्वीतयः ।पात्रे।
शुभानिवर्धंतांशिवा आपः सन्तु शिवाऋतवः
पु०
सन्तु शिवाअग्नयः सन्तु शिवाआहुतयः सन्तु
शिवाओषधयःसन्तु शिवावनस्पतयःसन्तु

शिवाअतिथयःसन्तु अहोरात्रे शिवेस्यातास् ।
ऋक् ॐशन्नः कनिक्रदद्देवः पर्जन्योअभिवर्षतु॥
शन्नोद्यावापृथिवी शंप्रजाभ्यः शन्नएधि द्विपदे
शंचतुष्पदे ॥१॥ यजुःशाखिनां मंत्रः । ॐ नि
कामेनिकामेनःपर्जन्योवर्षतु फलवत्योनऽओष
धयः पच्यंतां योगक्षेमोनः कल्पताम् ॥ २ ॥
पूर्णपात्रे जलं क्षिपेत् । शुक्रांगारकबुधबृहस्पति
शनैश्चरराहुकेतु सोमसहिता आदित्यपुरोगाः
सर्वेग्रहाः प्रीयंताम् । भगवान्नारायणः प्रीयतां
भगवान्स्वामी महासेनः प्रीयताम् । पुरोनुवा

दा० क्ययायत्पुण्यंतदस्तु याज्यया यत्पुण्यंतदस्तु
७ वषट्कारेणयत्पुण्यं तदस्तु प्रातः सूर्योदयेयत्पु
ण्यंतदस्तु एतत्कल्याणयुक्तं पुण्यमस्तु पुण्याह
कालान्वाचयिष्ये । वाच्यताम् ॥ ब्राह्मपुण्यमह
र्यच्चसृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवंनित्यंत
त्पुण्याहंब्रुवंतुनः ॥१॥ भो ब्राह्मणाः मम सकुटुं
बस्य सपरिवारस्य गृहे पुण्याहंभवंतोब्रुवंतु ॥२॥
ॐ पुण्याहम् ३ ऋद्धि ॥ ॐ उद्गातेवशकुनेसा
पु० मगायसि ब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववा
जी शिशुमतीरपीत्या सर्वतोनः शकुनेभद्रमा

वदविश्वतोनःशकुनेपुण्यमावद ॥ यजुः ॥ ॐ
पुनंतुमादेवजनाः पुनंतुमनसाधियः ॥ पुनंतुवि
श्वाभूतानिजातवेदः पुनीहिमा ॥ २ ॥ पृथिव्या
मुद्धृतायांतुयत्कल्याणंपुराकृतम् ॥ ऋषिभिः
सिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः ॥ १ ॥ भोब्रा
ह्मणाः ममसकुटुंबस्यसपरिवारस्यगृहे कल्या
णंभवंतोब्रुवंतु ॥ २ ॥ ॐ कल्याणम् ॥ ३ ॥
ऋक् ॐ अपासोममस्तेमिन्द्रप्रयाहि कल्याणी
जायासुरणंगृहेते ॥ यात्रथस्यबृहतोनिधानं
विमोचनंवाजिनोदक्षिणावत् ॥ १ ॥ यजुः ॐ

दा० यथेमांवाचंकल्याणी मावदानिजनेभ्यः ॥ ब्रह्म
८ राजन्याभ्या ७ शूद्रायचार्य्याय च स्वायचार
णायच ॥ प्रियोदेवानांदक्षिणायै दातुरिहभूयास
मयम्मेकामः समृद्ध्यतामुपमादोनमतु ॥ २ ॥
सागरस्यतुयाऋद्धिर्महालक्ष्म्यादिभिः कृता ॥
संपूर्णासुप्रभावाचतांतामृद्धिंब्रुवंतुनः ॥ १ ॥ भो
ब्राह्मणाः ममसकुटुंबस्यसपरिवारस्यगृहेऋद्धिंभ
वंतोब्रुवंतु ॥ २ ॥ ॐ ऋद्ध्यताम् ३ ॥ ऋद्धू ॥
पु० ॐ ऋद्ध्यामस्तोमंसनुयामवाजमानोमंत्रं स
रथेहोपयातम् ॥ यशोनपक्वंमधुगोष्वंत राभू

तांशोअश्विनोः काममप्राः ॥ १ ॥ यजुः ॥ ॐ
सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥
दिवंपृथिव्याऽ अद्ध्याऽरुहामाविदामदेवान्त्स्व
र्ज्योतिः ॥५॥ स्वस्तिस्तुयाऽविनाशाख्या पुण्य
कल्याणवृद्धिदा ॥ विनायकप्रियानित्यंतांतां
स्वस्ति ब्रुवन्तु नः ॥ १ ॥ भो ब्राह्मणाः ममस
कुटुंबस्यसपरिवारस्यगृहेस्वस्ति भवन्तोब्रुवंतु
२ ॥ ॐ स्वस्ति २ ॥ ऋक् ॥ ॐ स्वस्तिऋद्धि
प्रपथे श्रेष्ठारेक्णस्वस्त्यभियावाममेति ॥ सानो
अमासोअरेणनिपातुस्वावेशा भवतुदेवगोपाः

दा० ॥ १ ॥ यजुः ॐ स्वस्तिनइन्द्रो वृद्धश्रवाः
१ स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽ
अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ २ ॥
मृकंडसूनो रायुर्यद्ध्रुवलोमशयोस्तथा ॥ आयु
षातेनसंयुक्ताजीवेमशरदःशतम् ॥ १ ॥ जीवं
तुभवंतः ऋक् ॐ शतंजीवशरदोवर्द्धमानःशतं
हेमंताञ्छतमुवसंतान् । शतमिंद्राग्नीसवितावृह
स्पतिः शतायुषाहविषेमंपुनर्दुः ॥ १ ॥ यजुः ॥
पु० ॐशतमिन्नुशरदोऽअंतिदेवायत्रानश्चक्रा जर
संतनूनाम् । पुत्रा सोयत्र पितरो भवंति मानो

मध्यारीरिषतायुर्गतोः ॥ २ ॥ शिवगौरीविवाहे
याया श्रीरस्माकंसास्तुसद्मनि ॥ १ ॥ भोब्राह्म
णाः ममसकुटुंबस्यसपरिवारस्यगृहेश्रीरस्त्विति
भवंतो ब्रुवंतु ॥ २ ॥ ॐ अस्तु श्रीः ॥ ३ ॥
ऋक् ॐ श्रियेजातः श्रियआनिरीयायश्रियंव
योजरितृभ्यो दधाति ॥ श्रीयंवसानाऽअमृतत्व
मायन्भवंति सत्यासमिथामितद्रौ ॥ १ ॥ यजुः
ॐ मनसः काममाकूतिंवाचःसत्यमशीमहि ॥
पशुनाꣳरूपमन्नस्यरसोयशः श्रीः श्रयताम्मयि
स्वाहा ॥ २ प्रजापतिर्लोक पालोधाताब्रह्मासदेव

दा० राट् भगवाञ्छाश्वतोनित्यंसनोरक्षतुसर्वतः ॥१॥
१० भगवान्प्रजापतिः प्रीयताम् ऋक् ॥ ॐ प्रजापते
नत्वदेतान्यन्यो विश्वाजातानि परितबाभूव ॥
यत्कामास्तेजुहुमस्तन्नो अस्तुवयंस्यामपतयोर
यीणाम् ॥ ९ ॥ यजुः । ॐ प्रजापतेनत्वदेतान्य
न्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्ते
जुहुमस्तन्नोऽअस्त्वयममुष्य पितासाव स्यपिता
पु० वयꣳ स्यामपतयो रयीणांꣳ स्वाहा ॥ २ ॥
आयुष्मतेस्वस्तिमतेयजमानायदाशुषे ॥ कृताः

सर्वाशिषःसंतुऋत्विग्भिर्वेदपारगैः ॥ १ ॥ देवेन्द्र
स्ययथास्वस्तियथास्वस्तिगुरोर्गृहे ॥ एकलिंगेय
थास्वस्तितथास्वस्तिसदाममम ॥ २ ॥ ॐ
आयुष्मतेस्वस्ति ॥ ३ ॥ ऋक् ॥ ॐस्व
स्तये वायुमुपब्रवामहे सोमंस्वस्तिभुनस्यय
स्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआ
दित्यासोभवंतुनः ॥ १ ॥ यजुः ॐ प्रतिपन्था
मपद्महिस्वस्तिगामनेहसम् ॥ येनविश्वाःपरिद्वि
षोवृणक्तिविन्दतेवसु ॥ २ ॥ ऋक् ॥ ॐ महो

दा० अग्नेसमिधानस्यशर्म्मण्यनागा मित्रे वरुणे

११ स्वस्तये । श्रेष्ठेस्यामसवितुःसवीमनित देवानाम्

वोअद्याबृणीमहे ॥ १ ॥ यजुः ॥ ॐ विश्वानि

देवसवितर्दुरितानिपरासुव । यद्भद्रंतन्नऽआसुव ॥

मंत्रार्थाःसफलाः सन्तुपूर्णाःसंतुमनोरथाः ॥

शत्रूणांबुद्धिनाशोऽस्तुमित्राणामुदयोऽस्तुनः १

ऋग्वेदोऽयजुर्वेदःसामवेदोह्यथर्वणः ब्रह्मवक्त्रेस्थि

पु० तानित्यंनिम्मंतुतवशान्तवान् ॥ २ ॥ अक्षतान्वि

प्रहस्ताचु नित्यंग्रहन्ति येनराः ॥ चत्वारितेषां

वर्धते आयुःकीर्तिर्यशोबलम् ॥ ३ ॥ श्रीर्वर्चस्व
मायुष्यमारोग्य० ॥ ४ ॥ धनवान्पुत्रवाँल्लक्ष्मी
वान्भव। इति दानखंडोक्तं पुण्याहवाचनं संपू०।

इति

दानखण्डोक्तपुण्याहवाचन

समाप्तम्

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान ;

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट.
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

KHEMRAJ SHRIKRISHNADASS